तस्य त्यागो विगर्हितः । यो हि कश्चिद्द्विजान् हन्याद्गां वा लोकस्य मातरम् । शरणागतञ्च त्यजते तुल्यं तेषां हि हि पातकम् । श्येन उवाच । आहारात् सर्व्वभूतानि सम्भवन्ति महीपते ! । आहारेण विवर्द्धन्ते तेन जीवन्ति जन्तवः । शक्यते दुस्त्यजेऽप्यर्थे चिररात्राय जीवितुम् । न तु भोजनमुत्सृज्य शक्यं वर्त्तयितुं चिरम् । भक्ष्याद्वियोजितस्याद्य मम प्राणा विशाम्पते ! । विसृज्य कायमेष्यन्ति पन्थानमकुतोभयम् । प्रमृते मयि धर्म्मात्मन् ! पुत्रदारं विनङ्क्ष्यति । रक्षमाणः कपोतं त्वं बहून् प्राणान्न रक्षसि । धर्म्मं यो बाधते धर्म्मो न स धर्म्मः कुधर्म्मवत् । अविरोधात्तु यो धर्म्मः स धर्म्मः सत्यविक्रम ! । विरोधिषु महीपाल ! निश्चित्य गुरुलाघवम् । न बाधा विद्यते यत्र तं धर्म्मं समुपाचरेत् । गुरुलाघवमादाय धर्म्माधर्म्मविनिश्चये । यतो भूयांस्ततो राजन् ! कुरुष्व धर्म्मनिश्चयम् । राजोवाच । बहुकल्याणसंयुक्तं भाषसे विहगोत्तम ! । सुपर्णः पक्षिराट् किं त्वं धर्म्मज्ञश्चास्यसंशयम् । तथा हि धर्म्मसंयुक्तं बहु चित्रञ्च भाषसे । न तेऽस्त्यविदितं किञ्चिदिति त्वां लक्षयाम्यहम् । शरणैषिपरित्यागं कथं साध्विति मन्यसे । आहारार्थं समारम्भस्तव चायं विहङ्गम ! । शक्यश्चाप्यन्यथा कर्त्तुमाहारोऽप्यधिकस्त्वया । गोवृषो वा वराहो वा मृगो वा महिषोऽपि वा । त्वदर्थमद्य क्रियतां यद्वान्यदिह काङ्क्षसि । श्येन उवाच । न वराहं न चोक्षाणं न मृगान् विविधांस्तथा । भक्षयामि महाराज ! किं ममान्येन केनचित् । यस्तु मे दैवविहितो भक्ष्यः क्षत्रियपुङ्गव ! । तमुत्सृज महीपाल ! कपोतमिममेव मे । श्येनः कपोतमत्तीति स्थितिरेषा सनातनी । मा राजन् ! सारमज्ञात्वा कदलीस्कन्धमासजः । राजोवाच । राष्ट्रं शिवीनामृद्धं वै ददानि तव खेचर ! । यं वा कामयसे कामं श्येन ! सर्वं ददानि ते । विनेमं पक्षिणं श्येन ! शरणार्थिनमागतम् । येनेमं वर्जयेथास्त्वं कर्म्मणा पक्षिसत्तम ! । तदाचक्ष्व करिष्यामि न हि दास्ये कपोतकम् । श्येन उवाच । उशीनर ! कपोते ते यदि स्नेहो नराधिप ! । आत्मनो मांसमुत्कृत्य कपोततुलया धृतम् । यदा समं कपोतेन तव मांसं नृपोत्तम ! । तथा देयन्तु तन्मह्यं सा मे तुष्टिर्भविष्यति । राजोवाच । अनुग्रहमिमं मन्ये श्येन ! यन्माभियाचसे । तस्मात्तेऽद्य प्रदास्यामि स्वमांसं तुलया धृतम् । लोमश उवाच । उत्कृत्य स स्वयं मांसं राजा परमधर्म्मवित् । तुलयामास कौन्तेय ! कपोतेन समं विभो । ध्रियमाणः कपोतस्तु मांसेनाप्यतिरिच्यते । पुनश्चोत्कृत्य मांसानि राजा प्रादादुशीनरः । न विद्यते यदा मांसं कपोतेन समं धृतम् । तत उत्कृत्तमांसोऽसावारुरोह स्वयं तुलाम् । श्येन उवाच । इन्द्रोऽहमस्मि धर्म्मज्ञ ! कपोतो हव्यवाडयम् । जिज्ञासमानौ धर्म्मे त्वां यज्ञवाटमुपागतौ । यत्ते मांसानि गात्रेभ्य उत्कृत्तानि विशाम्पते ! । एषा ते भास्वरी कीर्त्तिर्लोकानभिभविष्यति । यावल्लोके मनुष्यास्त्वां कथयिष्यन्ति पार्थिव ! । तावत् कीर्त्तिश्च लोकाश्च स्थास्यन्ति तव शाश्वताः । इत्येवमुक्त्वा राजानमारुरोह दिवं पुनः । उशीनरोऽपि धर्म्मात्मा धर्म्मेणावृत्य रोदसी । विराजमानो वपुषा ह्यारुरोह त्रिविष्टपम्" १३१ अ० । उशीपूरको वाञ्छापूरको नरो यत्र । ३तदधिकृतदेशे जटाधरः ।

**उशीर** पु०न० वश—ईरन् किच्च । वीरणमूले (खसखस) तस्य गुणाः "उशीरं पाचनं शीतं स्तम्भनं लघु तिक्तकम् । मधुरं ज्वरहृद्वान्तिमदनुत् कफपित्तनुत् । तृष्णास्त्रविषवीसर्पदाहकृच्छ्रव्रणापहम्" भावप्र० "अगरुप्रक्कोशीरभद्रदारुकुङ्कुमानि पुन्नागकेशरञ्चेति" "चन्दनकुचन्दनह्रीवेरोशीरमञ्जिष्ठापयस्याविदारीशतावरीद्विङ्गुभिः" सुश्रु० स्वार्थे कन् तत्रैव । उशीरं पण्यमस्य किशरादि ष्ठन् । उशीरिक तद्विक्रेतरि स्त्रियां षित्वात् ङीष् । उशीनरस्यापत्यम् अण् । औशीनर तदपत्ये शिविप्रभृतौ ।

**उशीरवीज** पु०उशीरस्य वीरणमूलस्य वीजं योनिरत्र । उत्तरदिक्स्थे पर्वतभेदे "उशीरवीजं मैनाकं गिरिं श्वेतञ्च भारत ! । समतीतोऽसि कौन्तेय ! नीलशैलञ्च पार्थिव ! "इत्युपक्रम्य "श्वेतं गिरिं प्रवेक्ष्यामो मन्दरञ्चैव पर्वतम् । यत्र माणिवरो यक्षः कुवेरश्चैव यक्षराट्" भा०व० १३०अ० उक्तेस्तस्य उत्तरदिक्स्थत्वं मन्दरगिरिसन्निकृष्टत्वञ्च "तुषारचयसङ्काशो मन्दरस्यैव पर्वतः । उशीरवीजश्च गिरीरुद्रोपस्यस्तथाद्रिराट्"हरि०२३६अ०उक्तेः कैलाशसन्निकृष्टत्वमपि

**उशीरादि** न०चक्रदत्तेन ज्वरातिसाराधिकारोक्ते पाचनभेदे । "उशीरं बालकं मुस्तं धान्यकं विश्वभेषजम् । समङ्गाधातकी लोध्रं विल्वं दीपनपाचनम् । हन्त्यरोचकपिच्छामं विबन्धं सातिवेदनम् । सशोणितमतीसारं सज्वरं वाथ विज्वरम्" ।

**उशेन्य** त्रि० वश—बा० केन्य सं प्र० । कमनीये । "आ ये मातीरुशेन्योजनिष्ट"ऋ०८,३,६,"उशेन्यःकमनीयः"भा०